**अगृहीतकर** ( a-gṛhītakara ) *adj.* (a village) from which revenue (or tax) is not collected, revenue-free अगृहीतकरो वापि प्रगृहीतकरोऽपि वा । ग्रामः प्रदीयते यत्तु तद् दानं ग्रामजं मतम् Mānaso. ii. 19. 1016.

**अगृहीतकलङ्काङ्क** ( agṛhīta-kalaṅkāṅka ) *adj.* who has not incurred a stigma of disrepute त्यक्ताहङ्कृतिराश्वस्तमतिराकाशशोभनः । अगृहीतकलङ्काङ्को लोके विहर राघव YogVā. v. 18. 25.

**अगृहीतकल्प** ( agṛhīta-kalpa ) *adj.* [cf. P. v. 3. 67] almost (i. e. as good as) unknown or unperceived विमर्शाभावे हि प्रमाणगृहीतमपि वस्तु अगृहीतकल्पमेव Bhāsk. ii. 75. 15 (*on* ii. 3. 2)

**अगृहीतकान्त** ( agṛhīta-kānta ) *adj.* who has not taken a wife, who is not married हरे( ? ऽ)गृहीतकान्ते तु कथं सृष्टिः शुभावहा S'ivaP. ii(2). 11. 27 (80B. 14)

**अगृहीतकालनियम** ( agṛhīta-kālaniyama ) *adj.* [*f.* –ā] not observing the restrictions of time (out of season) अगृहीतकालनियमां कुसुमैः…ददृशुर्दशाननपुरीं हरयः RāmC. 26. 68.

**अगृहीतक्रम** ( agṛhīta-krama ) *adj.* wherein the time sequence (in perception) is not discernible ग्रहणद्वयमतिशैघ्र्यादगृहीतक्रमम् S'rutaPra. iB. 36. 26 (*on* i. 1. 1)

**अगृहीतगर्भ** ( agṛhīta-garbha ) *adj.* [*f.* –ā] who has not conceived अगृहीतगर्भात्रार्तवस्नातेत्युच्यते Aparā. 551. 1 (*on* 1. 256); अगृहीतगर्भा स्त्री आर्तवस्नातेत्युच्यते SmṛtiCan. v. 403. 17.

**अगृहीतगवय** ( agṛhīta-gavaya ) *adj.* who has not known a *Bos gavaeus* स च भूयोऽवयवसामान्ययोगोऽगृहीतगवयेनापि नागरकेण ग्रहीतुं शक्यते NyāyMañ. i. 134. 1.

**अगृहीतगह्वर** ( agṛhīta-gahvara ) *adj.* who has not committed a sin, sinless यस्मादजायन्त वात्स्यायना नाम गृहमुनयः ।…अगृहीतगह्वरा न्यक्कृतनिकृतयः HarṣaC. 62. 2 ( comm. गह्वरं पापम् )

**अगृहीतगु** ( agṛhīta-gu ) *adj.* [cf. P. i. 2. 48] who has not observed or perceived a bull or a cow न चागृहीते गवि संबन्धिता सामान्यानां ग्रहीतुं शक्येति युक्तमगृहीतगोः सादृश्याग्रहणम् NyāyRa. 439. 10 (*on* 5(6). 19)

**अगृहीतगोचर** ( agṛhīta-gocara ) *adj.* [*f.* –ā] pertaining to an unapprehended or unperceived object अगृहीतगोचरायां तु स्मृतौ वन्ध्यासुतेऽपि स्मरणप्रसङ्गः Kāśi. iii. 91. 18 (*on* 5(4). 160)

**अगृहीतग्रह** ( agṛhīta-graha ) *m.* perception of what has not been already perceived गृहीतमिति ग्रहादप्रमेति चेत् – न, गृहीतत्वस्य ग्रहात्सुतरां प्रामाण्यात् न चागृहीतग्रहोऽप्यप्रमा, अतिप्रसंगात् IṣṭaSi. 293. 21.

**अगृहीतग्रहण** ( agṛhīta-grahaṇa ) *n.* apprehension of what is not apprehended अतो नागृहीतग्रहणादप्रामाण्यम् Kāśi. i. 260. 11 (*on* 4. 139); अगृहीतग्रहणशक्तं प्रमाणमिति वरदविष्णुमित्रोक्तिरपि NyāyPari. 486. 9; अगृहीतग्रहणं परिच्छेदः NyāyRa. 432. 12 (*on* 5(6). 135); तथापि नाप्रामाण्यम् । न ह्यगृहीतग्रहणं प्रमाणलक्षणम् । अनुभूतिर्हि तल्लक्षणम् S'āstrDī. 61. 8 (*on* i. 1. 5)

**अगृहीतग्राहकता** ( agṛhītagrāhaka-tā ) *f.* the characteristic of being a means of perceiving something which is not already perceived विशेष्यविशेषणभावातिरेकेणागृहीतग्राहकतापि संभवत्येव सविकल्पस्य PrakaPañ. 166. 5; तस्यापि तत्तत्कालविशिष्टग्राहकत्वेनागृहीतग्राहकतयाज्ञाननिवर्तकत्वात् AdvaiSi. 654. 9.

**अगृहीतग्राहकत्व** ( agṛhītagrāhaka-tva ) *n.* state of being a means of perceiving something which is not already perceived यद्यपि याथार्थ्यमेव प्रामाण्यं नागृहीतग्राहकत्वम् NyāySu.(Ja.) 85B. 6 (*on* i. 1. 1)

**अगृहीतग्राहित्व** ( agṛhītagrāhi-tva ) *n.* the characteristic or feature of perceiving something which is not already perceived तस्माद्देशकालाधिक्याद्युक्तमगृहीतग्राहित्वमनुमानस्य NyāyRa. 363. 15 (*on* 5(4). 57); तत्र यद्यपि विशेष्यावृत्त्यप्रकारकत्वमगृहीतग्राहित्वं वा…विशिष्टज्ञानत्वं वा प्रामाण्यं स्वस्य न तेनैव न वा अनुव्यवसायेन ग्रहणयोग्यम् TattvCin. i(1). 126. 2; अगृहीतग्राहित्वस्य प्रमाणजन्यज्ञाने नियमे मानाभावः LaCandr. 668. 2; 372. 6; अगृहीतग्राहित्वान्नानुवादकत्वम् GuruCandr. i. 448. 23; अनेनैवाशयेनागृहीतग्राहित्वं प्रामाण्यमित्याचक्षते BhāṭṭCin. i. 11. 14 (*on* i. 1. 3); i. 131. 13 (*on* i. 1. 5); अगृहीतग्राहित्वात् प्रमाणस्य Bhāsk. ii. 77. 13 (*on* ii. 3. 2)

**अगृहीतग्राहिन्** ( agṛhīta-grāhin ) *adj.* perceiving something which is not already perceived कारणदोषबाधकज्ञानरहितमगृहीतग्राहि ज्ञानं प्रमाणम् S'āstrDī. 45. 2 (*on* i. 1. 5); BhaṭṭCin. i. 129. 3 (*on* i. 1. 5); प्रमाणत्वावच्छेदे नागृहीतग्राहिधीजनकत्वनियमात् LaCandr. 667. 39.

**अगृहीतचापमध्य** ( agṛhīta-cāpamadhya ) *adj.* who has not seized or grasped the central part of the bow अङ्गुलीभिस्त्रिभागतः संस्तुताभिः कालिकाभिरिवातिश्लिष्टाभिरगृहीतचापमध्याः AvantiKa. 104. 11.

[1]**अगृहीतजगत्कर** ( agṛhīta-jagatkara ) *adj.* who has not taken tax from the people क्षोणि( ? णी )पतिः पतत्याशु जराक्रान्त इव ध्रुवम् । त्यक्तदण्डः पदं वाञ्छन्नगृहीतजगत्करः JānaHa. 10. 32.

[2]**अगृहीतजगत्कर** ( agṛhīta-jagatkara ) *adj.* who has not taken the hand of men (for support), JānaHa. 10. 32.

**अगृहीतज्ञानगोचरत्व** ( agṛhītajñānagocara-tva ) *n.* characteristic of pertaining to a knowledge which is not (already) cognised न चैवं सति स्मरणमेतत् । अगृहीतज्ञानगोचरत्वात् NyāyKuA. iv. 26. 5.

**अगृहीतताम्बूल** ( agṛhīta-tāmbūla ) *adj.* who has not taken or received the betel अगृहीतताम्बूल एवोत्ताम्यता मनसा … सर्वानाहूयोपह्वरे वैद्यान् …पप्रच्छ HarṣaC. 221. 13.

**अगृहीतत्व** ( agṛhīta-tva ) *n.* **1** the state of not being received कथं पुनः पुत्रस्य प्रातिभाव्यादिप्राप्तिस्तर्हि । तदृणस्य पित्रागृहीतत्वात् ManuBh. ii. 149. 18 (*on* 8. 159); **2** non-acceptance वैदिकैरगृहीतत्वात् तथार्हतमतं यथा ĀgaPrā. 25. 23; **3** not being grasped or understood, non-perception, non-comprehension नायकाकारस्यागृहीतत्वात् JayaMa. 115. 6 (*on* 2. 3); तस्मात् परकीयचित्तं नालम्बनसहितं गृह्यते तस्यालम्बनस्यागृहीतत्वात् RājMār. 50. 14; अग्निसद्भावस्य व्याप्त्यावगृहीतत्वात् NyāyRa. 363. 11 (*on* 5(4). 57); व्याप्तेरगृहीतत्वात् TarkBhā.(Ke.) 38. 14; अन्वयांशे तेषां (i. e. शब्दानाम्) सामर्थ्यस्यागृहीतत्वात्…पदार्थानां परस्परान्वयविषयिणी वाक्यार्थप्रतिपत्तिर्न स्यात् S'ivārkaMaDī. i. 177. 19 (*on* i. 1. 4); अन्वयप्रयोजकत्वं हि नान्वितवृत्तित्वेन गृहीतत्वं किन्त्वनन्वितवृत्तित्वेनागृहीतत्वम् BhāṭṭCin. i. 65. 33 (*on* i. 1. 4); **4** absence of covering, non-inclusion न विद्यते योगो वर्णसमाम्नाये येषां तेऽयोगाः । अनुपदिष्टत्वादुपदिष्टैरगृहीतत्वाच्चेत्यर्थः LaS'abdeS'e. i. 190. 4.

**अगृहीतत्वप्रसङ्ग** ( agṛhītatva-prasaṅga ) *m.* contingency of the state of not being perceived or comprehended तदप्रतिपत्तौ स्वरूपस्यागृहीतत्वप्रसङ्गात् S'rutaPra. iA. 120. 12 (*on* i. 1. 1)

**अगृहीतदक्षिणत्व** ( agṛhītadakṣiṇa-tva ) *n.* the state of not having accepted *dakṣiṇā* (sacrificial fee) ऋत्विजामस्वामित्वेऽप्यगृहीतदक्षिणत्वेन कर्तृत्वात् TattvPrakā. 125B. 8 (*on* iii. 4. 45)

[1]**अगृहीतदण्ड** (agṛhīta-daṇḍa) *adj.* who has no knowledge of (what) a stick (is) न ह्यगृहीतदण्डो दण्डिनमवगन्तुमर्हति TattvVai. 204. 25 (*on* 4. 21)

[2]**अगृहीतदण्ड** ( agṛhīta-daṇḍa ) *adj.* from whom no fine has been recovered अन्विति अगृहीतदण्डमित्यर्थः BālamBha. ii. 347. 27 (*on* 2. 306)

**अगृहीतदार** ( agṛhīta-dāra ) *adj.* who has not taken a wife, who has not married हरेऽगृहीतदारे तु सृष्टिर्नैषा सनातनी । भविष्यतीति तत् सत्यं भवता प्रतिपादितम् S'ivaP. ii(2). 11. 43 (81A. 10)

**अगृहीतदिश्** ( agṛhīta-diś ) *adj.* whose whereabouts are unknown प्रणष्टस्त्वगृहीतदिक् Vaija. 122. 219.

**अगृहीतदीक्ष** ( agṛhīta-dīkṣa ) *adj.* who has not undergone initiation अहं यदि स्यामगृहीतदीक्षो ध्रुवं विधास्ये सुनिबन्धमस्य S'aṅkaDigVi.(Mā.) 7. 83.

**अगृहीतधन** ( agṛhīta-dhana ) *adj.* **1** who has not inherited money समं यावद्गृहीतं तावदेव देयं न वृद्धिः । तत्सुतस्य प्रपौत्रस्यादेयमगृहीतधनस्य Mitā. 167. 12 (*on* 2. 50); 171. 15 (*on* 2. 54); **2** who has not borrowed money अगृहीतधने तत्र कार्यो दिव्येन निर्णयः S'ukrNī. iv. 5. 254.

**अगृहीतनवभक्त** ( agṛhīta-navabhakta ) *adj.* who has not collected the new (year's) harvest क्षीणपुराणभक्तमगृहीतनवभक्तम्…अमित्रम्…उपहन्तुं मार्गशीर्षीं यात्रां यायात् ArthS'ā. iii. 47. 4 (9. 1)

**अगृहीतपण** ( agṛhīta-paṇa ) *adj.* from whom charges are not taken (for the use of a gambling hall) अगृहीतग( ? प )णाच्छतिकवृद्धेर्दशकं शतं ( गृह्णीयात् ) DīpKa. 64. 16 (*on* 2. 199)

**अगृहीतपयोऽन्त** ( agṛhīta-payonta ) *adj.* of unknown (i. e. inconceivable) extent of waters यद्युशन्ति पवनाः … लङ्घितुं यमगृहीतपयोऽन्तम् DvyāśraKā. 8. 86.

**अगृहीतपरमसूक्ष्मत्व** ( agṛhītaparamasūkṣma-tva ) *adj.* the absolute minuteness of which is not apprehended or perceived रूपपरमाणवो निरन्तरोत्पादा अगृहीतपरमसूक्ष्मत्वा इति चेत् TattvVai. 48. 13 (*on* 1. 43)

**अगृहीतपरमार्थ** ( agṛhīta-paramārtha ) *adj.* who has not grasped the underlying truth or purpose पञ्चसु रक्ताः पञ्च विनष्टा यत्रागृहीतपरमार्थाः । एकः पञ्चसु रक्तः प्रयाति भस्मान्ततां मूढः SthāṇṬ. 292A. 6.

**अगृहीतपरस्परभेद** ( agṛhīta-parasparabheda ) *adj.* whose mutual difference or distinction is not understood नीलम् … पीतादिकं च…सरन् वा